ध्वाङ्क्षनासिका, स्त्री, (ध्वाङ्क्षस्य नासिका इव फलमस्याः ।) काकनासालता । इति राजनिर्घण्टः ॥

ध्वाङ्क्षपुष्टः, पुं, (ध्वाङ्क्षेण काकेन पुष्टः प्रतिपालितः ।) कोकिलः । इति हारावली । ४४ ॥

ध्वाङ्क्षमाची, स्त्री, (ध्वाङ्क्षान् काकान् मचते पूजयति फलदानेनेति । मच पूजायाम् + अण् । गौरादित्वात् ङीष् ।) काकमाची । इति राजनिर्घण्टः ॥

ध्वाङ्क्षवल्ली, स्त्री, (ध्वाङ्क्षवत् वल्ली लता ।) काकनासा । इति राजनिर्घण्टः ॥

ध्वाङ्क्षादनी, स्त्री, (अद्यते भक्ष्यते या सा । अद + ल्युट् । स्त्रियां ङीप् । ध्वाङ्क्षाणां काकानामदनी ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षारातिः, पुं, (ध्वाङ्क्षाणामरातिः शत्रुः ।) पेचकः । इति हलायुधः ॥

ध्वाङ्क्षी, स्त्री, (ध्वाङ्क्षवदाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकोलिका । इति मेदिनी । षे, १६ ॥

ध्वाङ्क्षोली, स्त्री, काकोली । इति राजनिर्घण्टः ॥

ध्वानः, पुं, (ध्वन + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २२ ॥ (यथा, राजतरङ्गिण्याम् । ३ । १८ ।

"शश्वामाक्रन्दितध्वानो न च चौरो व्यभाव्यत ॥")

ध्वान्तं, क्ली, (ध्वन + "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति क्तप्रत्ययेन निपातनात् साधुः ।) अन्धकारः । इत्यमरः । १ । ८ । ३ ॥ (यथा, भागवते । ३ । ८ । २४ ।

"क्षणातपच्छायुतमङ्क्षरत्न-
दुभिर्हतध्वान्तयुगान्ततोये ॥")

ध्वान्तचित्तः, पुं, (ध्वान्ते अन्धकारे चित्तः प्रथितः ।) खद्योतः । इति शब्दरत्नावली ॥

ध्वान्तशात्रवः, पुं, (ध्वान्तस्य शात्रवः ।) श्योणाकवृक्षः । इति शब्दचन्द्रिका ॥ सूर्य्यचन्द्राग्नयश्च ॥

ध्वान्तारातिः, पुं, (ध्वान्तस्य अरातिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । १० ॥ चन्द्राग्नी च ॥

ध्वान्तोन्मेषः, पुं, (ध्वान्ते उन्मेषः प्रकाशो यस्य ।) खद्योतः । इति त्रिकाण्डशेषः ॥

ध्वृ, कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) वकारोपधः । कौटिल्यमिह कुटिलीकरणम् । ध्वरति तरुं वायुः । इति दुर्गादासः ॥

---

## न

न, नकारः । तवर्गपञ्चमवर्णः व्यञ्जनविंशवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ । "दन्त्या ऌतुलसाः स्मृताः ॥") तत्पर्य्यायः । मेषः २ दीर्घौ ३ शौरिः ४ । इति बीजाभिधानम् ॥ तत्स्वरूपम् । यथा,—

"नकारं शृणु चार्व्वङ्गि ! कोटिविद्युल्लताकृतिम् ।
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली ॥
पञ्चप्राणात्मकं वर्णं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥

"वामतः कुण्डली रेखा ऊर्द्ध्वाधःक्रमतः स्थिता ।
चन्द्रसूर्य्याग्निरूपा सा मात्रा वाणी प्रकीर्त्तिता ॥"

तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्य नकारस्य वक्ष्यते शृणु भाविनि ! ।
दलिताञ्जनवर्णाभां ललज्जिह्वां सुलोचनाम् ॥
चतुर्भुजां कोटराक्षीं चारुचन्दनचर्च्चिताम् ।
कृष्णाम्बरपरीधानामीषद्धास्यमुखीं सदा ॥
एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य नामानि यथा,—

"नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
ऊर्द्ध्वगामी द्विरण्डश्च वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिर्व्वर्त्म किरणी ज्वालिरागमः ॥
वामनो ज्वालिनी दीर्घो निरीहः सुगतिर्व्वियत् ।
शब्दात्मा दीर्घघोणा च हस्तिनापुरमेचकौ ॥
गिरिनायकनीलौ च शिवोऽनादिर्म्महामतिः ॥"
इति नानातन्त्रशास्त्रम् ॥

(अनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।
"नः खादिः पो मुचादिः ।" इति ॥ काव्यादौ अस्य प्रथमप्रयोगे फलं यथा, वृत्तरत्नाकर-टीकायाम् ।

"दो धः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं
पवर्गः ॥")

न, व्य, निषेधः । (यथा, मनुः । ६ । ४७ ।

"अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥")

उपमा । इति मेदिनी । ने, १ ॥ आद्यस्य पर्य्यायः । नहि २ अ ३ नो ४ अभावः ५ । इत्यमरः । ३ । ४ । ११ ॥ अना ६ ना ७ । इति भरतः ॥ नञर्थश्च ॥

नंशुकः, त्रि, (नश्यतीति । नश + "पचिनशोर्णुकन्कनुमौ च ।" उणां २ । ३० । इति णुकन् नुमागमश्च ।) नाशकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

नंष्टा, [ ऋ ] त्रि, (नश + तृच् । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् ।) नाशाश्रयः । इति नशधातोस्तृचि नुमागमनिष्पन्नः ॥

नः, पुं, (नमतीति । नम + अन्येष्वपीति डः ।) सुगतः । बन्धः । द्विरण्डः । स्तुतः । इति मेदिनी । ने, १ ॥ रत्नम् । इत्येकाक्षरकोषः ॥ द्वितीयाचतुर्थीषष्ठीबहुवचनान्तस्यास्मच्छब्दस्य सान्तरूपोऽयञ्च ॥ (यथा, मुग्धबोधे ।

"पुष्णातु वो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वशुभानि वो नः ॥")

नःक्षुद्रः, त्रि, (नसा नासिकया क्षुद्रः ।) क्षुद्रनासिकः । इति हेमचन्द्रः । ३ । ११५ ॥

नकुटं, क्ली, नासिका । इति शब्दमाला ॥

नकुलः, पुं, (नास्ति कुलं यस्य । "नभ्राण्नपान्नवेदा-" इति ।" ६ । ३ । ७५ । इति नञो न लोपादि ।) जन्तुविशेषः । नेउल । इति वेजी इति च भाषा । तत्पर्य्यायः । पिङ्गलः २ सर्पहा ३ बभ्रुः ४ । इति हेमचन्द्रः । ४ । ३६८ ॥ सूचीवदनः ५ सर्पारिः ६ लोहिताननः ७ । (यथा, महाभारते । १२ । १५ । २० ।

"सत्त्वैः सत्त्वा हि जीवन्ति दुर्ब्बलैर्ब्बलवत्तराः ।
नकुलो मूषिकानत्ति विडालो नकुलन्तथा ।
विडालमत्ति श्वा राजन् ! श्वानं व्यालमृग-
स्तथा ॥")

तस्य मांसगुणाः । पिच्छिलत्वम् । वातनाशित्वम् । श्लेष्मपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुराजस्य चतुर्थपुत्त्रः स माद्रीगर्भे अश्विनीकुमाराभ्यां जातः । इति महाभारतम् ॥ पुत्त्रः । इति शब्दमाला ॥ शिवः । यथा, विदग्धमुखमण्डने ।

"युधिष्ठिरस्य या कन्या नकुलेन विवाहिता ।
पूजिता सहदेवेन सा कन्या वरदा भवेत् ॥"

कुलरहिते, त्रि ॥

नकुलाढ्या, स्त्री, (नकुलेन नकुलगन्धेन आढ्या प्रचुरा ।) गन्धनाकुली । इति राजनिर्घण्टः ॥

नकुली, स्त्री, (नकुल + ङीष् ।) कुक्कुटी । मांसी । इति मेदिनी । ले, १०० ॥ शङ्खिनी । इति धरणिः ॥ कुङ्कुमम् । इति हेमचन्द्रः ॥ हकारः । इति बीजाभिधानम् ॥ नकुलस्य भार्य्या च ॥

नकुलीशः, पुं, (नकुल्या ईशः ।) भैरवविशेषः । यथा, पीठमालायाम् ।

"नकुलीशः कालिपीठे दक्षपादाङ्गुली मम ॥"

हकारः । यथा,—

"हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः
प्रिये ! ।
महेशो नकुली चैव वराहो गगनं रविः ॥
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि ! ॥"
इति हकारपर्य्याये बीजाभिधानम् ॥

नकुलेष्टा, स्त्री, (नकुलानामिष्टा प्रिया ।) रास्ना । इत्यमरः । २ । ४ । ११५ ॥ भेदनाई इति भाषा । एतत्पर्य्यायो यथा,—

"नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

नक्क, क नाशने । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः । नाशनं नष्टीकरणम् । क, नक्कयति पापं गङ्गा । इति दुर्गादासः ॥

नक्तं, [ म् ] व्य, रजनौ । इत्यमरः । ३ । ४ । ६ ॥ (यथा, माघे । १ । २१ ।

"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरो-
स्तुषारमूर्त्तेरिव नक्तमंशवः ॥")

नक्तं, क्ली, (नज + क्तः ।) रात्रिः । लक्षणया नक्तव्रतम् । यथा,—

"उपवासात् परं भैक्ष्यं भैक्ष्यात् परमयाचितम् ।